श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

विल्लूर् नडादूर् श्री श्रीनिधेः कृतिषु

# ॥ यादवाद्रिस्तुतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ यादवाद्रिस्तुतिः ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

आनन्दपूर्णोऽस्मि न च श्रमो मे
पापानि सर्वाणि विनाशितानि।
स्वयं प्रसन्नो यदुभूधरेन्दुः
संपत्कुमारो यदयं नतोऽद्य॥ 1॥

संपत्कुमारं सकलाभिवन्द्यं
सद्भिस्समास्वादितपादपद्मम्।
नत्वा यदुक्ष्माधरमौलिभागे
स्थितोऽस्म्यहं नन्दथुमौलिभागे॥ 2॥

सीतां लब्धुमतीव पूर्वमभवन् पृथ्वीधरा वानरैः
नीता वारिनिधिं ततश्च महितं प्रापुर्यशश्शाश्वतम्।
तेभ्योऽप्यभ्यधिकोयदुक्षितिधरस्सोऽयं यदस्मिन् पुनः
सीतानायक एष तादृशधनुष्कोटिं पुराऽदर्शयत्॥ 3॥

जयतु जयतु भूमिस्सर्वसारैकभूमिः
जयतु जयतु तस्यां यादवाद्रीन्द्रमूर्तिः।
जयतु जयतु तस्यां पाठशालापिसेयं
जयतु जयतु तस्यां भारतीनृत्तलीला॥ 4॥

भूमौ को नु सतां प्रतीपकरणे बद्धादरो वर्तते
सद्यस्तं प्लुतमारचय्य निरसुं कर्तास्म्यहं किं न्विति।

श्रीमद्यादवभूधराग्रभुवि सः श्रीमानृकण्ठीरवः
गम्भीराकृतिराश्रितेष्टफलदः जागर्ति योगासने ॥ 5 ॥

॥ इति यादवाद्रिस्तुतिः समाप्ता ॥